श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीचापपत्तनसदालयसुप्रतिष्ठौ
श्रीरुक्मिणीकरसरोरुहलालनीयौ।
श्रीवेदमौलिरमणीयमणीव मान्यौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 1॥

भामाकरग्रहणकण्टकितौ मनोज्ञौ
सद्यःप्रफुल्लसरसीरुहकान्तिचोरौ।
साम्राज्यचिह्नपरिकर्मितमूलभागौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 2॥

श्रीनन्दगेहकृतसङ्क्रमणौ जनन्याः
अग्रेकृताग्र्यनवनीतनवीननृत्तौ।
मञ्जीरशिञ्जितमनोहरतालतानौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 3॥

एतौ कथं नु मृदुलौ नवपल्लवाभौ
क्रूप्रातिघोरशकटासुरमर्दनौ ते।
इत्यादरेण जननीकरसम्प्रमृष्टौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 4॥

वेदावतंसमुनिमानसनन्दवास -
सञ्चारचारुसुकुमारतरौ सुमृष्टौ।
गोपाङ्गनाभिरभिरामकराङ्गुलीभिः
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 5॥

वज्रध्वजाङ्कुशसरोरुहशङ्खचक्र -
चिह्नैर्विचित्रितसदङ्गणगेहभागौ।
साश्चर्यभक्तिभरगोपसमीक्षितौ ते
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 6॥

कालीयमौलितलकृत्तविचित्रनृत्तौ
चित्रं तदीयमणिसन्ततिरञ्जितौ ते।
अन्यानवाप्यनिजचिह्नतदुत्तमाङ्गौ
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 7॥

प्रातर्विलोक्य मुनयस्सवितुस्सुताया -
श्चिह्नानि सैकतगतानि ययोः प्रहृष्टाः।
तामीरयन्ति भगवत्पदवाहिनीति
तौ राजगोपचरणौ शरणं प्रपद्ये॥ 8॥

हा ! हन्त ! हन्त ! मृदुलौ मम तातपीडां
सन्ताडनैरकुरुतामिति जाम्बवत्या।
अङ्के निधाय करपल्लवलालितौ ते
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 9॥

याभ्यां हि विष्णुपदभूषणकन्यकेयं
नित्यं विभाति परिभूषितसैकतेति।
आश्लिष्य तां वहति विष्णुपदी नदी सा
श्रीराजगोपचरणौ शरणं प्रपद्ये॥ 10॥

प्रपत्तिरेषा प्रकृतौ स्थितानां
कृतैरधैरप्रकृतिं गतानाम्।
महौषधं मानिधिना वितीर्णं
श्रीराजगोपालकृपाबलेन ॥ 11 ॥

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि प्रपत्तिः समाप्ता ॥